# શ્રીશઙ્કરાચાર્યસ્તોત્રકદમ્બમ્

Shri Shankaracharyastotrakadambam

sanskritdocuments.org

November 10, 2018

Shri Shankaracharyastotrakadambam

# શ્રીશઙ્કરાચાર્યસ્તોત્રકદમ્બમ્

## Sanskrit Document Information

Text title : shankarAchAryastotrakadambam

File name : shankarAchAryastotrakadambam.itx

Category : deities_misc, sachchidAnanda-shivAbhinava-nRisiMhabhAratI, gurudeva

Location : doc_deities_misc

Author : Sachchidananda Shivabhinava Nrisimha Bharati Swamigal

Proofread by : PSA Easwaran psawaswaran at gmail.com

Latest update : November 9, 2018

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

November 10, 2018

*sanskritdocuments.org*

# શ્રીશઙ્કરાચાર્યસ્તોત્રકદમ્બમ્

(કાલટિક્ષેત્રે)
ચિન્મુદ્રાં દક્ષહસ્તે પ્રણતજનમહાબોધદાત્રીં દધાનં
વામે નમ્રેષ્ટદાનપ્રકટનચતુરં ચિહ્નમપ્યાદધાનમ્ ।
કારુણ્યાપારવાર્ધિં યતિવરવપુષં શઙ્કરં શઙ્કરાંશં
ચન્દ્રાહઙ્કારહુઙ્કૃત્સ્મિતલસિતમુખં ભાવયામ્યન્તરઙ્ગે ॥ ૧॥

બીજમિદં મત્પાદપ્રપતનમખિલેપ્સિતાર્થપૂગસ્ય ।
ઇતિ બોધનાય ધત્સે ચિન્મુદ્રાં કિં યતીશાન ॥ ૨॥

માયાવશાજ્જગદિદમનુક્ષણં ભિન્નભિન્નમાભાતિ ।
ઇતિ બોધનાય ગુરુરાડરૂપમપિ રક્તમમ્બરં ધત્સે ॥ ૩॥

યતિવેષધરણકાલે ત્યક્તા નાગેશ્વરાઃ કિં ત્વામ્ ।
અધુના માલાવ્યાજાત્સેવન્તે શઙ્કર બ્રૂહિ ॥ ૪॥

ગુરુવર પાહિ સદા માં નતવરવરદાનચણ્ડ ધૃતદણ્ડ ।
અકલઙ્કક્ષયહીનસ્વયશશ્ચન્દ્રપ્રકાશિતાશાન્ત ॥ ૫॥

સોમસદૃક્ષમુખાબ્જં કોમલપદયુગ્મવિજિતકઞ્જાતમ્ ।
સીમવિહીનકૃપાબ્ધિં શ્યામગ્રીવાવતારગુરુમીડે ॥ ૬॥

શઙ્કરગુરુરાડ્ગગનં હંસાદ્યૈઃ પક્ષિભિઃ સદા સેવ્યમ્ ।
કરુણામારુતપૂરિતમનિશં ધ્યાયામિ હૃત્સરોજેઽહમ્ ॥ ૭॥

અજ્ઞાનાભિધવૃત્રગર્વહરણં વિજ્ઞાનવજ્રોલ્લસ-
ત્પાણિં કામમુખાસુરક્ષયકરં સ્વાત્માભિધસ્વર્ગદં
કિઞ્ચ પ્રૌઢવિવેકનામકજયન્તોદ્યન્નિજોત્સઙ્ગકં
શ્રીમચ્છઙ્કરનામકં હૃદિ સદા કુર્વે યતીન્દ્રં મુદા ॥ ૮॥

શઙ્કરગુરુરાટ્તાર્ક્ષ્યં પાપોરગદર્પચર્વણધુરીણમ્ ।
લબ્ધ્વાઽઽકાશગતિપ્રદમનિશં પ્રણમામિ નિત્યવિયદાપ્ત્યૈ ॥ ૯॥

અજ્ઞોઽપ્યશ્રુતશાસ્ત્રાણ્યાશુ કિલ વ્યાકરોતિ યત્કૃપયા ।
નિખિલકલાધિપમનિશં તમહં પ્રણમામિ શઙ્કરાચાર્યમ્ ॥ ૧૦॥

વિલોક્ય ત્વામબ્જં શિરસિ નિદધાનં હિ સતતં
પયોજં ચાપ્યાગાદ્વહતિ કૃપયા મામપિ ગુરુઃ ।
અહં ચાપ્યબ્જં ખલ્વત ઇતિ તદાશાનુસરણા-
ત્પયોજં ધત્સે કિં શિરસિ વદ નમ્રાય યતિરાટ્ ॥ ૧૧॥

આધારાદિષડમ્બુજાનિ ગુરુણા યોગેન ભિત્ત્વા ચિરા-
ચ્છીર્ષસ્થં ચ સહસ્રપત્રજલજં સમ્પ્રાપ્ય સૌખ્યં પરમ્ ।
યત્પ્રાપ્સ્યન્તિ તદાશુ મત્પ્રણમનાદ્ભૂયાદિતિ ખ્યાપનં
કર્તું ફુલ્લસરોજસપ્તકમહો ધત્સે ગુરૂણાં ગુરો ॥ ૧૨॥

અષ્ટાઙ્ગયોગમચિરાલ્લભતે મત્પાદનમ્રલોકા ઇતિ ।
બોધયિતું ધત્સે કિં કમલાન્યષ્ટૌ ગુરો બ્રૂહિ ॥ ૧૩॥

અણિમાદિસિદ્ધિલક્ષ્યો વરયન્ત્યષ્ટાપિ સત્વરં ભક્તમ્ ।
ઇતિ બોધનાય જગતાં ધત્સે કમલાષ્ટકં ગુરો બ્રૂહિ ॥ ૧૪॥

ફાલે નેત્રં ગરલગલતાં ચેદહં ધારયામિ
સ્યુર્ભીતા મે નતજનવરા નૈવ સામીપ્યમીયુઃ ।
ઇત્યેતેષાં ભયહૃતિકૃતે નેત્રયુગ્મં સિતાં કિં
ગ્રીવાં ધત્સે યતિવર શિવ બ્રૂહિ નમ્રાય મહ્યમ્ ॥ ૧૫॥

ભાસતે હૃદિ સદા પરમાત્મા
સંવસન્તિ નિગમાશ્ચ મુખાબ્જે ।
યત્પદપ્રણમનાજ્જનતાયા-
સ્તં નમામિ સતતં યતિવીરમ્ ॥ ૧૬॥

વાઞ્છિતં મમ જવાદ્વિતરાર્ય
પ્રાણદાનચતુરોઽસિ મૃતસ્ય ।
અપ્યસાધ્યમિહ તેઽસ્તિ જગત્યાં
કિં વદાશુ ગુરુશઙ્કર મહ્યમ્ ॥ ૧૭॥

જન્મમૃત્યુહરણીં તવ વક્ત્રા-
મ્ભોજનિઃસૃતસુધાં ન પિબામિ ।

ભાષ્યસંઙ્ઘલસિતાં વિતરારં
દેશિકેન્દ્ર મમ પાણ્યવલમ્બમ્ ॥ ૧૮॥

માયામયાશેષવિશેષશૂન્ય માનાતિગસ્વપ્રભ ચિત્સ્વરૂપ ।
દેહેન્દ્રિયપ્રાણમનોવિદૂર શ્રીશઙ્કર ત્વત્પદયોઃ પતામિ ॥ ૧૯॥

આસેતુશીતાચલમધ્યવર્તિજનાન્નિજાચારપરાન્વિરચ્ય ।
સૌખ્યં પ્રયચ્છાશુ ચ સર્વકાર્યેષ્વેષાં કૃપાસાગર શઙ્કરાર્ય ॥ ૨૦॥

કરોમિ કાયેન તવાઙ્ઘ્રિસેવાં બ્રવીમિ વાચા તવ પુણ્યનામ ।
ધ્યાયામિ મૂર્તિં તવ હૃત્સરોજે પ્રસીદ શીઘ્રં યતિરાજ મહ્યમ્ ॥ ૨૧॥

એકાન્તવાસાદરમાત્મનિષ્ટામનન્યદેવત્વમજામિતાં ચ ।
ત્વત્કાખિલગ્રન્થવિલોકને ત્વં દત્ત્વા યતીનાં વર પાહિ નમ્રમ્ ॥ ૨૨॥

કદાપિ કુત્રાપિ કિમપ્યકાર્યં નાહં પ્રકુર્યાં બહુ હિંસિતોઽપિ ।
યથા તથા માનસદાર્ઢ્યમાશુ દત્ત્વા ગુરૂણાં વર પાહ્યમુષ્મૈ ॥ ૨૩॥

ઘોરાપસ્મૃતિમુખ્યરોગનિચયાહઙ્કારમારાજ્જવા-
ત્કુર્વાણં નતલોકરક્ષણચણં યોગપ્રદં સત્વરમ્ ।
દેવપ્રાર્થનયાઽઽત્તભૂતલગતિં ધર્મૈકસંસ્થાપન-
વ્યગ્રં શઙ્કરદેશિકં હૃદિ સદા કુર્વે મનઃશુદ્ધયે ॥ ૨૪॥

ઉદ્યદ્ભાનુસહસ્રગર્વહરણપ્રાશસ્ત્યયુગ્વસ્ત્રધૃ-
ક્સઙ્ખ્યાહીનશમાદિસદ્ગુણગણૈરત્યાદરાત્સેવિત ।
શ્રીમત્પદ્મપદામરેશકરધાત્ર્યાદ્યૈર્વિનેયૈર્યુત
શ્રીમચ્છઙ્કરદેશિકેન્દ્ર ચરણાલમ્બં પ્રયચ્છાશુ મે ॥ ૨૫॥

મય્યપ્રાર્થિતમેવ તે પ્રસરતુ વ્યાજાનપેક્ષા કૃપા
પાપાનાં શ્વપચૈર્ભિયાપિ પરયા તદ્વજ્જુગુપ્સાવશાત્ ।
ત્યક્તાનાં સદનેઽપિ તેન મહતી સ્યાત્તે સમજ્ઞા પ્રભો
કિં રાત્રિન્દિવપુણ્યકર્તૃષુ કૃપાધાનેન ભૂયાદ્ગુરો ॥ ૨૬॥

શુદ્ધાદ્વૈતપથસ્ય પાલનકૃતે પૂર્વં ત્વયા સ્થાપિત-
સ્થાનેષ્વન્યતમસ્થશિષ્યતતિગસ્તત્કાર્યકૃત્યક્ષમઃ ।
અજ્ઞાનાં ધુરિ કીર્તનીયચરિતો નાદ્યાપિ વિદ્યાલય-
સ્તસ્માત્સ્થાનમિદં ગુરૂત્તમ કૃપાવાર્ધે ત્વમેવાશ્રય ॥

યદ્વા દુર્મતભેદપાટવવતીં મેધાં નવોન્મેષિણીં

વિદ્યામશ્રુતશાસ્ત્રપાઠનચણાં દદ્યા દ્રુતં ચેદ્ગુરો ।
સાહાય્યં ચ સુધન્વપાર્થિવસદૃગ્રાજાવલેસ્તર્હ્યહં
ત્વદ્દીક્ષાબલતો યતે યતિપતે તત્ત્વાધ્વસંવૃદ્ધયે ॥ ૨૮॥

ઇતિ શૃઙ્ગેરિ શ્રીજગદ્ગુરુ શ્રીસચ્ચિદાનન્દશિવાભિનવનૃસિંહ-
ભારતીસ્વામિભિઃ વિરચિતં શ્રીશઙ્કરાચાર્યસ્તોત્રકદમ્બં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

---

*Shri Shankaracharyastotrakadambam*
pdf was typeset on November 10, 2018

Please send corrections to *sanskrit@cheerful.com*